## तासि च क्लृपः । (६०/२३६२)

[1]कृप उत्तरस्य तासेः सकारादेश्चार्धधातुकस्य परस्मैपदेषु इडागमो न भवति । श्वः कल्प्ता । कल्प्स्यति । अकल्प्स्यत् । चिक्लृप्सति । परस्मैपदेषु इत्येव, [2]कल्पितासे । [3]कल्पिष्यते । कल्पिषीष्ट । अकल्पिष्यत । चिकल्पिषते । क्लृपेरप्या[4]त्मनेपदेन समानपदस्थस्य इडागमः इष्यते । अन्यत्र[5] प्रतिषेधः । कृत्यपि हि परस्मैपद-लुकि च प्रतिषेधो भवति, चिक्लृप्सिता, चिक्लृप्स त्वम् [6]इति ॥

## अचस्तास्वत्थल्यनिटो नित्यम् । (६१/२२९४)

[7]तासौ ये नित्यानिटो धातवः अजन्ताः, तेभ्यस्तासाविव थलि इडागमो न भवति[8] । याता – ययाथ[9] । चेता – चिचेथ । नेता – निनेथ । होता – जुहोथ । अचः इति किम् ? भेत्ता – बिभेदिथ । तास्वत् इति किम् ? लूत्वा – लुलविथ । थलि इति किम् ? [10]याता – ययिव । ययिम । अनिड्ग्रहणं नित्यम् इत्यनेन विशेषणार्थम् । नित्यग्रहणं किम् ? विधोता, विधविता – [11]विदुधविथ । [12]तासि विभाषितेट्, थलि नित्यमिडागमो भवति । तास्वत् इति वतिनिर्देशः किमर्थः ? तासौ सतस्थलि प्रतिषेधार्थः । यो हि तासावसन्, असत्त्वाच्च [13]नित्यानिट्, तस्य थलि प्रतिषेधो न भवति । जघसिथ । उवयिथ । उत्तरसूत्रेऽपि तास्वदिति वर्तते । अदादेशो हि घसिः, वेञादेशश्च वयिस्तासौ नास्ति ॥

## उपदेशेऽत्वतः । (६२/२२९७)

उपदेशे यो धातुरकारवान् तासौ नित्यानिट् तस्मात् तासाविव थलि इडागमो न भवति । [14]पक्ता – पपक्थ । यष्टा – इयष्ठ । शक्ता – शशक्थ । उपदेशे इति किम् ? कर्ष्टा – चकर्षिथ । अत्वतः इति किम् ? भेत्ता – बिभेदिथ । [15]तपरकरणं किम् ? राद्धा – रराधिथ । तास्वत् इत्येव, जिघृक्षति । जग्रहिथ । नित्यमनिटः इत्येव, अङ्क्ता, अञ्जिता – आनञ्जिथ ॥

## ऋतो भारद्वाजस्य । (६३/२२९६)

[16]ऋकारान्ताद् धातोः भारद्वाजस्याचार्यस्य मतेन तासाविव नित्यानिटस्थलि इडागमो न भवति । स्मर्ता – सस्मर्थ । ध्वर्ता – दध्वर्थ । 'सिद्धे सत्यारम्भो [नियमार्थः' (कात. प. ६२), ऋत एव भारद्वाजस्य[17], नान्येषां धातूनाम् । ययिथ । वविथ । पेचिथ । शेकिथ । तदयमर्थात् पूर्वयोः योगयोर्विकल्पः । तपरकरणमृकारान्तस्य निवृत्त्यर्थम् । तथा हि सति विध्यर्थमेतत् स्यात् ॥

---

1. कृपू सामर्थ्ये तस्मात् परस्य तासः क. 2. श्वः कल्पिता ह. 3. श्वः कल्पिष्यते विकल्पिष्यते क. 4. आत्मनेपदात् इडागमः ब. 5. सर्वत्र इत्यधिकम् क. 6. चिक्लप्सितुं चिक्लप्सितव्यम् चिक्लप्सितम् इत्यधिकम् ब. 7. नेटि इति वर्तते इत्यधिकम् क. 8. आदिनियमात् प्राप्तः प्रतिषिध्यते इत्यधिकम् ह. 9. वाता ववाथ इत्यधिकम् क. 10. पाता पपिव पपिम क, ययौ ययिव ययिम ह. 11. विधविथ क. 12. तासौ क. 13. नित्यमनिट् क. 14. शक्ता शशक्थ इ. 15. तपरकरणेन ब. 16. तास्वत् थलि इति वर्तते इत्यधिकम् क. 17. आचार्यस्य मतेन इत्यधिकम् क, नान्यस्मात् धातोः ब. इ.